रोल नं. | | | | | | | | |

105

मुद्रित पृष्ठों की संख्या : 6

**405 (IAF)**

# 2018

# संस्कृतम्

**समय : 3 घण्टे ]** **[ पूर्णांक : 100**

## खण्ड – 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए) –

अस्माकम् आधुनिकं जीवनं बहुशः संघर्षमयं दृश्यते। समाजे सर्वत्र भ्रष्टाचारः, मानवमूल्यानां विच्छेदः, सदाचार–सत्सम्प्रदायादीनां विलोपः इत्यादयः व्यापाः परिदृश्यन्ते। समस्तस्यापि अस्य फलं जाति–भाषा–धर्म–जल–प्रान्तादीन् निमित्तीकृत्य समाजे अन्तः कलहः, अस्मासु पारस्परिक सम्बन्धानां विच्छेदः, सामाजिक समरसतायाः ह्रासः इत्यादयः। अतः भवति महती मानसिकी अशान्तिः। क्षुद्रं निमित्तीकृत्य पतिपत्न्योः कलहः, कार्यालये सहचरस्य प्रोन्नतिम् अवलोक्य असहिष्णुता, नवनवोन्मेषकेषु चलवाणीयादिषु, अभिनव दूरदर्शनादिषु, इलेक्ट्रानिकसाधनेषु, कारयानादिषु विविधभोग्यवस्तुषु च महामोहः, सुपथेन कुपथेन वा अधिकाधिकं धनम् अर्जनीयम् इति अत्याशा, योग्यतायाः अभावेऽपि अधिकारेषु पुरस्कारेषु च अत्यासक्तिः इत्यादयः अस्मासु प्रतिदिनं परिवर्धमानाः परिदृश्यन्ते। एतदर्थं वयं विश्रान्तिं विहाय दिशि दिशि प्रधावामः।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4=2

(i) अस्माकम् आधुनिकं जीवनं कीदृशं दृश्यते ?

(ii) समाजे सर्वत्र कः विद्यते ?

(iii) विविध भोग्यवस्तुषु कः दृश्यते ?

(iv) वयं किं विहाय दिशि दिशि प्रधावामः ?

(ख) संस्कृतस्य पूर्णवाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) 1×2=2

(i) मानवमूल्यानां कः परिदृश्यते ?

(ii) कार्यालये सहचरस्य प्रोन्नतिम् अवलोक्य का जायते ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए)– 1×4=4

(i) अस्माकम् आधुनिकं जीवनम् अत्र 'अस्माकम्' सर्वनाम पदं कस्मै प्रयुक्तम् ?

(ii) जीवनम् इति पदस्य विशेषणपदं चित्वा लिखत।

(iii) सुपथेन इति पदं कस्यां विभक्तौ प्रयुक्तम् ?

(iv) प्राचीनम् इति पदस्य विपरीतार्थकं पदं चित्वा लिखत।

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिए) 2

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. कलकत्ता निवासी नारायणः वर्षाकाले बद्रीनाथ धाम दर्शनार्थं गतवान्। ततः सः केरलनिवासिनं स्वमित्रं गोकुल प्रसादम् एकं पत्रमलिखत्। अस्मिन् पत्रे मञ्जूषातः उचित पदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत– ½×10=5

(कलकत्ता निवासी नारायण वर्षा ऋतु में बद्रीनाथ धाम देखने गया। वहाँ से उसने केरल निवासी अपने मित्र गोकुल प्रसाद को एक पत्र लिखा। उसके द्वारा लिखे गये पत्र में मंजूषा में दिये गये पदों में से उचित पद लेकर रिक्त स्थान भरते हुए पत्र को पुनः उत्तर पुस्तिका में लिखिए)

 [ P.T.O.

Downloaded from cclchapter.com

**मञ्जूषा** – दर्शनार्थम्, बदरिकाश्रमतः, शीतलहरी, दर्शनम्, गोकुलप्रसाद, पर्यटकानाम्, धाम, नारायणः, वर्तते, दर्शनीयः

(i) ....................

दिनांक : 10–09–17

प्रिय मित्र (ii) ....................

सप्रणयं नमस्ते !

अत्र कुशलं तत्रास्तु। आशासे यदिमं समाचारं प्राप्य भवतः मनः प्रसन्नं भविष्यति। अहं श्रीबद्रिनाथस्य (iii) .................... पंक्तौ स्थितोऽस्मि। अद्य प्रातः आरभ्यपर्वतशिखराणि मेघाच्छन्नानि सन्ति। मध्ये मध्ये (iv) .................... हृत्पंजरं कम्पयन्ती इव प्रसरति। अधिकः सम्मर्दः न आसीत्। अतः अहं प्रातः एव (v) .................. प्राप्तवान्।

वर्षाकाले बदरिकाश्रमे दर्शकाः विरलाः भवन्ति। किन्तुवंगीय (vi) .................... न्यूनता नास्ति। हिमालय पर्वत शिखरे वर्षाविलासः (vii) .................... भवति। वस्तुतः श्रीबद्रिविशालस्य (viii) .................... यथा नित्योत्सवमुखरं तथैव नित्यवर्षा प्रखरम् अपि (ix) .................... कथ्यते–मेघस्य उदयमात्रेण अत्र वृष्टिः भवति।

भवदीयः सुहृद्

(x) ....................

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत– ½×10 = 5

(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को भरकर उत्तरपुस्तिका में पुनः लिखिए)

स्वामी रामतीर्थः अमेरिकादेशे यदा प्रवासं कुर्वन् आसीत्। तदवसरे काचित् महिला तं (i) ................. आगता। सा दुःख मिश्रितेन स्वरेण रामतीर्थम् अवदत्–" (ii) ...................... मम एकमात्र पुत्रः अस्वास्थ्यकारणतः दिवंगतः। तस्मात् अहं (iii) .................... हताशाम् अनुभवामि। मम जीवने आनन्दः विलुप्तः अस्ति। किं मयासः (iv) .................... पुनः प्राप्येत ?" तदा रामतीर्थः अवदत्–"आर्ये ! रामस्य राज्ये (v) .................... प्राप्येत एव। किन्तु तदर्थं योग्यमूल्यं दातव्यं भवेत्।" महिला अवदत्–"अस्तुदास्यामि।"

एतत् श्रुत्वा रामतीर्थः एकम् अनाथं (vi) .................... दर्शयन् तां महिलाम् अवदत्–"एतं स्वपुत्रं मत्वा (vii) .................... पालयेत।" क्षणं विरम्य सा महिला अवदत्–"एतत् तु कठिनं (viii) ...................." रामतीर्थः दृढस्वरेण अवदत्–"एवं तर्हि अभिलषितः आनन्दः अपि भवत्या न प्राप्येत्।" अन्ते सा महिला तस्य अनाथबालकस्य (ix) .................... अंगीकृत्य तं बालकम् आत्मना सह नीतवती। केषांचित् दिनानाम् अनन्तरं सा (x) .................. दृष्ट्वा अवदत्–"आर्य ! भवदुक्तं सत्यम्। इदानीम् अहं महान्तम् आनन्दम् अनुभवामि।"

**मञ्जूषा** – स्वामिवर्य, महतीम्, द्रष्टुम्, आनन्दः, सर्वमपि, कार्यम्, रामतीर्थम्, बालकम्, भवती, पालनम्

4. अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतभाषायां लिखत– 1×5 = 5

(नीचे लिखे किसी एक विषय पर पाँच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए)

(i) उत्तराखण्डराज्यम् (ii) ममप्रियपुस्तकम् (iii) सदाचारः

## खण्ड – 'ग' (अनुप्रयुक्त–व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरुत– 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए)

(i) अभयं नक्तमभयं दिवा नः। (ii) सत्यान्न प्रमदितव्यम्।

(iii) भूषणान्यवमुच्य अस्मै। (iv) तत् किं ना ज्ञायि अद्यापि।

(v) कोऽपि न प्रविशति रात्रौ। (vi) न च मूर्खशतान्यपि।



Downloaded from cclchapter.com

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहाः लेखनीयाः – 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों का विग्रह कीजिए)

(i) विज्ञाप्यो वसुधाधिपः। (ii) यस्याः शक्रसमो भर्ता।

(iii) प्रविष्टोऽस्मि तपोवनम्। (iv) सत्याय मितभाषिणाम्।

(v) भवादृशानां प्रवेशसमयो भवति। (vi) या प्रत्यहं किल सदा।

7. निम्नलिखितेषु वाक्येषु कोष्ठान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1×8 = 8

(नीचे लिखे वाक्यों में कोष्ठक के अंतर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए)

(i) सत्यान्न ................ । (प्र + मद् + तव्यत्)

(ii) अपि ................ अस्माकम्। (निर् – गुण – ष्यत्)

(iii) शुल्के विपणितं ................ । (राजन् + यत्)

(iv) तदन्वये ................ । (शुद्धि + मतुप्)

(v) सत्यं कथय कस्त्वं ? कुत ................। (आ + या + क्त)

(vi) कर्णामृतं सूक्तिरसं ................। (वि – मुच् + ल्यप्)

(vii) रथे निवेश्य रात्रौ वनं ................। (नी + क्तवतु)

(viii) कस्यापि संकेतैः ................ पारयामि। (नृत् + तुमुन्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्– 1×5 = 5

(नीचे लिखे वाक्यों में कर्ता और क्रिया की अन्विति कीजिए)

(i) स्त्रियो बालाश्च न किमपि .................... । (प्रष्टव्यम्/प्रष्टव्याः)

(ii) दीर्घप्रयासेन .................... हि वस्तु। (कृतम्/कृता)

(iii) देव ! लोकाः मां सर्वज्ञं ....................। (कथयति/कथयन्ति)

(iv) प्राची यदा ....................। (हसति/हसन्ति)

(v) लक्ष्म्याः रक्षार्थं पत्न्याः सहयोगः ...............। (अनिवार्यम्/अनिवार्यः)

9. अधोलिखितेषु वाक्येषु कोष्ठान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्– 1×5 = 5

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिए)

(i) भरतो वा भवेद् राजा .................... वाननु तत् समम्। (अस्मद्)

(ii) विद्यावतां विद्या एव .................... अस्ति। (रूप)

(iii) हल्दीघाटी चकितचेतकचक्रमाणां .................. अस्ति। (स्थल)

(iv) उपस्थितोऽहं ................ पुत्रः ऋतध्वजः। (शत्रुजित्)

(v) किं तावन्मे ................ प्रतीक्षा। (तत्)

## खण्ड – 'घ' (पठितांश–अवबोधनम् भाग - I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) --

संवृते किञ्चिदन्धकारे भुशुण्डी स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत–प्रत्यागतं च विदधानः, प्रतापदुर्गदौवारिकः कस्यापि पादक्षेपध्वनिमिवाश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् सत्यापि दीपप्रकाशे कमप्यनवलोकयन् गम्भीरस्वरेणैवम् अवादीत्--"कः कोऽत्र भोः ? कः कोऽत्र भोः ?" इति।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) दौवारिकः किं स्कन्धे निधाय आगत–प्रत्यागतं दिदधानः आसीत् ?

(ii) कः पादक्षेपध्वनिमिवाश्रौषीत् ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) प्रतापदुर्गदौवारिकः किम् अवादीत् ?



Downloaded from cclchapter.com

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'निधाय' इति पदस्य प्रकृति–प्रत्यय निर्देशं कुरुत ?

(ii) 'अवादीत्' इति क्रियापदं कस्मिन् लकारे भवति ?

(iii) 'अश्रौषीत्' इति क्रियापदस्य कर्तृपदं किम् ?

11. अधोलिखित नाट्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

सीता – आर्यपुत्र ! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्। अपूर्वः खल्वस्यायासः।

रामः – सुमित्रामातः ! किमिदम् ?

लक्ष्मणः – कथं कथं किमिदं नाम।
क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।
इदानीमपि सन्देहः किं क्षमा निर्मनस्विता ।।

रामः – सुमित्रामातः। अस्मद्राज्यभ्रंशो भवत उद्योगं जनयति।
आः अपण्डितः खलु भवान्।
भरतो वा भवेद् राजा वयं वा ननु तत् समम्।
यदि तेऽस्ति धनुश्श्लाघा स राजा परिपाल्यताम् ।।

लक्ष्मणः – न शक्नोमि रोषं धारयितुम्। भवतु भवतु। गच्छामस्तावत्। (प्रस्थितः)

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) सौमित्रिणा कस्मिन् काले धनुर्गृहीतम् ?

(ii) भुवि शोच्यासने कः आसीत् ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए) – 1

(i) कः रोषं धारयितुं न शक्नोति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'निर्मनस्विता' इति पदे प्रकृति–प्रत्यय निर्देशं कुरुत ?

(ii) 'भवतु' इत्यस्मिन् पदे कः लकारः प्रयुक्तः ?

(iii) 'सुमित्रा माता यस्य सः' अस्य समस्त पदं चित्वा लिखत ?

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

न दुर्जनः सज्जनतामुपैति शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधा–समुद्रे न मन्दरो मार्दवमभ्युपैति।।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) सज्जनतां कः न उपैति ? (ii) सुधा–समुद्रे कः निमग्नः ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) किं सति अपि मन्दरः मार्दवं न अभ्युपैति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'शठताम्' इत्यस्य विलोमपदम् अत्र किम् ?

(ii) 'अभ्युपैति' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति ?

(iii) 'शिक्ष्यमाणः' इत्यस्मिन् प्रयुक्तः प्रत्ययः कः ?

13. निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) –

(क) 'मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय'

(i) इमां पंक्तिं कः कां प्रति कथयति ? 1+1 = 2

(ख) 'तत् किं कोऽपि न प्रविशति रात्रौ ?'

(i) एषा पंक्तिः कस्मात् ग्रन्थात् संकलिता ? (ii) अस्य ग्रन्थस्य लेखकः कः ? 1+1 = 2



Downloaded from cclchapter.com

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत– 2+2 = 4

(नीचे लिखे गये क, ख खण्डों में प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए)

(क) अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्।

**भावार्थ**– (i) गन्धर्वराजविश्वावसोः नृपोपवनं बहुधा सुन्दरमस्ति।

(ii) गन्धर्वराजविश्वावसोः राजोद्यानं रूचिकरमस्ति।

(iii) गन्धर्वराज विश्वावसोः प्रमदोद्यानं रमणीयमस्ति।

(ख) एकदा समुपस्थास्यसि मदन्तिके

**भावार्थ**– (i) एकस्मिन् दिने मत्समीपात् समागमिष्यसि। (ii) एकस्मिन् दिने मम समीपे समुपस्थिता भविष्यसि।

(iii) एकस्मिन् दिने मम पार्श्वे स्थास्यसि।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तभावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत– ½×8 = 4

(नीचे दिये गये श्लोक के भावार्थ को मंजूषा में दिये गये पदों से पूर्ण करके लिखिए)

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।

विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ।।

**भावार्थ**– अस्मिन् संसारे (i) ................ मौनं (ii) ................ कृते स्वाधीनं (iii) ................ गुणस्वरूपं (iv) ................ कृतमस्ति। (v) ............. सभायां (vi) ............. विशेषरूपेण (vii) ............. आभूषणं (viii) ............।

| **मञ्जूषा** – ब्रह्मणा, मूर्खाणाम्, एकमात्रं, विदुषाम्, आवरणं, तत्, तेषाम्, भवति |
|---|

15. अधोलिखित श्लोक द्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत–

(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए)

(क) तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।

दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव ।। ½×4 = 2

**अन्वयः**–शुद्धिमति (i) ................ शुद्धिमत्तरः (ii) ................ दिलीप इति (iii) ................ इन्दु (iv) ................ प्रसूतः।

(ख) अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।

भोजने चामृतं वारि भोजनान्ते विषापहम् ।। ½×4 = 2

**अन्वयः**– वारि (i) ................ भेषजं (ii) ................ जीर्णे बलप्रदं (iii) ................ चामृतं वारि (iv) ................ विषापहं (भवति)।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत– 1×4 = 4

(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिए)

| **स्तम्भ 'अ'** | **स्तम्भ 'ब'** |
|---|---|
| (क) शरीरेऽरिः प्रहरति | (i) यौवने विषयैषिणाम्। |
| (ख) शैशवेऽभ्यस्तविद्यानाम् | (ii) निमेषमात्रेण भजेद् विनाशम्। |
| (ग) दीर्घप्रयासेन कृतं हि वस्तु | (iii) सप्तमासदिनत्रयम्। |
| (घ) पञ्चाशत्पञ्चवर्षाणि | (iv) हृदये स्वजनस्तथा। |

17. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रसंगानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत– 1×4 = 4

(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचितार्थ कोष्ठकों से चुनकर लिखिए)

(क) जगच्चक्षुषि <u>भास्करे</u>। (भास्वति / आतपे / शोचिषि)

(ख) मुञ्चानि मातरि <u>शरम्</u>। (धनुः / करम् / छुरम्)

(ग) सदा <u>वहति</u> मारुतः। (सरति / नुदति / याति)

(घ) यथाहं <u>पश्यामि</u> पुरुषः भार्यायाम्। (प्रयामि / निरीक्षे / नयामि)



Downloaded from cclchapter.com

## खण्ड – 'घ' (संस्कृत साहित्य परिचयः भाग - II)

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत–
(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए)

(क) कवयः — 1×3 = 3

(i) वेदकुमारी घई
(ii) कालिदासः
(iii) नारायणपण्डितः
} देशः

(ख) कवयः — 1×3 = 3

(i) रमाकान्त रथः
(ii) भासः
(iii) भर्तृहरिः
} कालः

(ग) कवयः — 1×4 = 4

(i) अश्वघोषः
(ii) ईशदत्तः शास्त्री
(iii) अम्बिकादत्त व्यासः
(iv) बल्लालसेनः
} काऽपि एका रचना

**अथवा**

(क) निम्नांकित वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम्– 1×5 – 5
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिए)

(i) बुद्धचरितस्य रचयिता ................. अस्ति। (विष्णुशर्मा, भासः, अश्वघोषः)
(ii) 'रघुवंशम्' ................. गण्यते। (खण्डकाव्येषु, महाकाव्येषु, गीतिकाव्येषु)
(iii) लोकोत्तरानन्ददाता ................. काव्यनामभाक्। (प्रबन्धः, मुक्तकः, निबन्धः)
(iv) कालिदासस्य नाट्यकृतयः ................. सन्ति। (चतस्रः, तिस्रः, पञ्च)
(v) महाकाव्यस्यनायकः ................. भवति। (धीरोदात्तः, धीरशान्तः, धीरललितः)

(ख) संस्कृत महाकाव्यानां पञ्चविशेषताः लिखत। 5
(संस्कृत महाकाव्यों की पाँच विशेषताएँ लिखिए)

********



Downloaded from cclchapter.com